# इकाई ५ अव्ययपरिचयः प्रयोगश्च (अव्यय परिचय एवं प्रयोग)

**रूपरेखा**


५.० उद्देश्यम् (Objective)

५.१ प्रस्तावना (Preface)

५.२ अव्ययं नाम किम् ? (What is Indeclinable Words)

५.३ अत्र, तत्र, कुत्र, अन्यत्र, सर्वत्र, एकत्र (यहाँ, वहाँ, कहाँ, कहीं और, सब जगह, इक्कट्ठे / Here, There, Where, Somewhere else, Everywhere,Together)

५.४ च, अपि, एव, इति, यत्, पूर्वम्, इदानीम् (और, भी, ही, ऐसा, कि, पहले, अब / and, also or too, only, this is what, that, before, now)

५.५ कति, कदा, कुतः, इतः , ततः, कथम्, किमर्थम् (कितने, कब, कहाँ से, यहाँ से, वहाँ से, कैसे, क्यों / How many, when, from where, from here, from there, how, why)

५.६ आम्, न, यतः, निश्चयेन (हाँ, नहीं, क्योंकि, निश्चित रूप से / Yes, no, because, definitely, )

५.७ पुरतः, पृष्ठतः, वामतः, दक्षिणतः, उपरि, अधः, अन्तः (सामने, पीछे, बाईं ओर, दाईं ओर, ऊपर, नीचे, अन्दर/In front of, behind, to the left, to the right, above, under, inside)

५.८ अद्य, श्वः, परश्वः, प्रपरश्वः, ह्यः, परह्यः, प्रपरह्यः (आज, आने वाला कल, आने वाला परसों, आने वाला तरसों, बीता हुआ कल, बीता हुआ परसों, बीता हुआ तरसों/Today, tomorrow, day after tomorrow, three days after today, yesterday, day before yesterday, three days before today. )

५.९ सारांशः (Summary)

५.१० बोधप्रश्नानानाम् उत्तराणि (Answers to the knowable questions)

५.११ सन्दर्भग्रन्थसूची (Bibliography)

५.१२ सहायकोपयोगिपाठ्यसामग्री (Useful supporting study material)

## ५.० उद्देश्यम् (Objective)

**एतं पाठं पठित्वा छात्राः अव्ययानाम् अर्थान्** (अव्ययों का अर्थ ) **ज्ञास्यन्ति ।**

- लघुवाक्येषु अव्ययानां प्रयोगं (अव्ययों का प्रयोग ) कर्तुं सक्षमाः भविष्यन्ति ।
- अव्ययानां सर्वदा समानमेव रूपं (अव्ययों का सर्वदा समान रूप) भवति इति ज्ञास्यन्ति ।
- छात्राः संस्कृतेन संभाषणं (संस्कृत में संभाषण) कर्तुं सरलतया सक्षमाः भविष्यन्ति ।
- वाक्येषु अव्ययप्रयोगेन सह पूर्वपठितपाठानां अभ्यासः (अव्यय के प्रयोगों से पहले पढ़े हुए पाठों का अभ्यास) अपि अत्र भविष्यति ।

## ५.१ प्रस्तावना (Preface)

**वाक्य-निर्माण-प्रक्रियायाम् अव्ययानां महत्त्वपूर्णं स्थानं भवति । अव्ययैः वाक्यानाम् अर्थाः सुगमाः भवन्ति । अव्ययानां रूपं त्रिषु लिङ्गेषु, त्रिषु वचनेषु, सर्वासु विभक्तिषु च सर्वदा समानम् एव भवति । यदि छात्राः लकारैः विभक्तिभिः च सह अव्ययानां अर्थम् ज्ञास्यन्ति, तर्हि संस्कृत-सम्भाषणे लेखने च सक्षमाः भविष्यन्ति । अतः अत्र विविधानाम् अव्ययानां सविस्तरं ज्ञानं वयम् एतस्मिन् अध्याये प्राप्स्यामः । चित्र-माध्यमेन छात्राः पाठ्य-विषयान् सम्यक् ज्ञातुं शक्नुवन्ति । अतः अत्र संकल्पनानाम् अवबोधनाय विविध-चित्राणि अपि दर्शितानि सन्ति । छात्राः उदाहरणैः नियमान् शीघ्रम् अवगन्तुं शक्नुवन्ति अतः नियमबोधाय अनेकानि उदाहरणानि प्रदत्तानि सन्ति ।**

(वाक्य निर्माण की प्रक्रिया में अव्ययों का महत्त्वपूर्ण स्थान होता है । अव्ययों से वाक्यों के अर्थों को समझना सरल हो जाता है । अव्ययों के रूप तीनों लिंगों में, तीनों वचनों में और सभी विभक्तियों में सर्वदा समान ही रहते हैं । यदि छात्र अव्ययों के अर्थ जानेंगे, तो संस्कृत सम्भाषण में और लेखन में सक्षम हो जायेंगे । इसलिये यहाँ विविध अव्ययों का विस्तृत ज्ञान हम इस अध्याय में प्राप्त करेंगे । चित्रों के माध्यम से छात्र पाठ्य-विषयों को अच्छी प्रकार से समझ सकते हैं । अतः यहाँ संकल्पनाओं को समझाने के लिये भिन्न-भिन्न चित्र भी दिखलाए गए हैं । छात्र उदाहररणों के द्वारा नियमों को शीघ्र ही समझ जाते हैं अतः नियमों को समझाने के लिये अनेक उदाहरण भी यहाँ दिये गये हैं | )

## ५.२ अव्ययं नाम किम् ? ( What is Indeclinable ) ( अव्यय किसे कहते हैं ? )

**अध्यापिका - प्रियच्छात्राः ! यस्य शब्दस्य सर्वदा एकम् एव रूपं भवति, सः शब्दः अव्ययम् इति उच्यते । त्रिषु लिङ्गेषु, सर्वासु विभक्तिषु सर्वेषु च वचनेषु अव्ययस्य समानम् एव रूपं भवति ।** ( प्रिय छात्रों ! जिस शब्द का सर्वदा एक ही रूप रहता है, वह शब्द अव्यय कहा जाता है । तीनों लिंगों में, सभी विभक्तियों में और तीनों वचनों में अव्यय का समान ही रूप होता है । )

**रञ्जना - महोदये ! किं वाक्येषु एतेषाम् अव्ययानां प्रयोगः भवति ?** (महोदया ! क्या वाक्यों में इन अव्ययों का प्रयोग होता है ?)

**अध्यापिका - आम् रञ्जने ! वाक्येषु एतेषां बहु प्रयोगः भवति । अद्य वयं विविधानाम् अव्यायानाम् अर्थान् प्रयोगं च ज्ञास्यामः ।** (हाँ रञ्जना ! वाक्यों में इनका बहुत प्रयोग होता है । आज हम विविध अव्ययों के अर्थों और प्रयोगों को जानेंगे । )

## ५.३ अत्र, तत्र, कुत्र, अन्यत्र, सर्वत्र, एकत्र (यहाँ, वहाँ, कहाँ, कहीं और, सब जगह, इक्कट्ठे / Here, There, Where, Somewhere else, Everywhere, Together)

**अध्यापिका - पश्यन्तु, उच्चैः पठन्तु अवगच्छन्तु च** – (देखें, ज़ोर से पढ़ें और समझें) (See, read loudly and understand)

**पुष्पं कुत्र अस्ति ?**

(पुष्प कहाँ है ?/ Where is flower?)

**पुष्पम् अत्र अस्ति ।**

(पुष्प यहाँ है । / Flower is here)

**मेघः कुत्र अस्ति ?**

(मेघ कहाँ है ?/ Where is Cloud?)

**मेघः तत्र अस्ति ।**

(मेघ वहाँ है । / Cloud is there)

**कन्दुकं कुत्र अस्ति ?**

(कन्दुक कहाँ है ?/ Where is Ball?)

**कन्दुकम् अन्यत्र अस्ति ।**

(कन्दुक कहीं और है/Ball is somewhere else)

**ईश्वरः सर्वत्र अस्ति।**

(ईश्वर सर्वत्र है/ God is everywhere)

**बालाः एकत्र सन्ति।**

(बच्चे एकत्र हैं/Kids are together)

**अध्यापिका** – **बालकाः कुत्र क्रीडन्ति ?** (बालक कहाँ खेलते हैं ?)

**छात्राः** - **बालकाः तत्र क्रीडन्ति।** ( बालक वहाँ खेलते हैं। )

**अध्यापिका** - **बालिकाः कुत्र पठन्ति ?** ( बालिकाएँ कहाँ पढ़ रही हैं ? )

**छात्राः** - **बालिकाः अत्र पठन्ति।** ( बालिकाएँ यहाँ पढ़ रही हैं। )

**अध्यापिका** - **मन्त्री कुत्र अस्ति ?** ( मन्त्री कहाँ है ? )

**छात्राः** - **मन्त्री अन्यत्र अस्ति।** ( मन्त्री कहीं और है। )

**अध्यापिका** - **देवः कुत्र अस्ति ?** ( देव कहाँ है ? )

**छात्राः** - **देवः सर्वत्र अस्ति।** ( देव सब जगह है। )

बोधप्रश्नाः -१

१. **चित्रं दृष्ट्वा रिक्तस्थानानि पूरयन्तु** – (चित्र को देखकर रिक्तस्थान भरें -)

(क) दूरदर्शनम् अत्र अस्ति। वृक्षः तत्र अस्ति। अग्निः अन्यत्र अस्ति।

(ख) घटी ..... अस्ति।

(ग) फलानि ..... सन्ति।

(घ) मेघः ..... अस्ति।

(ङ) अध्यापिका ..... अस्ति

(च) पुस्तकम् ..... अस्ति।

(छ) जलम् ..... अस्ति।

(ज) दीपः ..... अस्ति।

(झ) विमानम् ..... अस्ति।

## ५.४ च, अपि, एव, इति, यत्, पूर्वम्, इदानीम् (और, भी, ही, ऐसा, कि, पहले, अब/ and, also or too, only, this is what, that, before, now)

**अध्यापिका - पश्यन्तु, उच्चैः पठन्तु, अवगच्छन्तु च** – (देखें, ज़ोर से पढ़ें और समझें)
(See, read loudly and understand)

**अत्र स्यूतः, अङ्कनी पुस्तकं च सन्ति।**

(यहाँ बस्ता, पेन्सिल, और पुस्तक है। /

A bag, pencil and a book are here.)

**मीनः जले एव जीवति।**

(मच्छली जल में ही जीवित रहती है/

Fish survives in water only.)

**'तुम मुझे खून दो, मैं तुम्हें आज़ादी दूँगा' इति सुभाषचन्द्रबोसः उक्तवान्**

('तुम मुझे खून दो, मैं तुम्हें आज़ादी दूँगा' ऐसा सुभाष चन्द्र बोस ने कहा था/'You give me blood, I will give you freedom' this is what Subhash Chandra Bose

द्वितीय बोधः

**सः जलम् इच्छति। सा अपि जलम् इच्छति।**

(उसे जल चाहिये। उसे भी जल चाहिये।/



**लालबहादुरशास्त्री उक्तवान् यत् 'जय जवान जय किसान'**
लाल बहादुर शास्त्री जी ने कहा था कि 'जय जवान जय किसान'
Lal Bahadur Shastri Ji had said that 'Jai Jawan Jai Kisan'



**पूर्वम् सः बालः आसीत्।**
**(पहले वह बालक था/**
**Before he was a boy.)**

**अधुना सः वृद्धः अस्ति।**
**(अब वह वृद्ध है / Now**
**he is an old person.)**



**छात्राः** - **चित्रे किं किम् अस्ति** (चित्र में क्या-क्या है ?)

**अध्यापिका** - **चित्रे स्यूतः अङ्कनी कर्तरी पुस्तकं च सन्ति।** (चित्र में बस्ता, पेन्सिल, कैंची और पुस्तक है।)

**छात्राः - हरिद्वारं के के गमिष्यन्ति ?** (हरिद्वार कौन कौन जाएगा ?)

**अध्यापिका - छात्राः अध्यापिकाः च गमिष्यन्ति ।** (छात्र और अध्यापिका जायेंगे ।)

**छात्राः - किं प्रधानाचार्या अपि गमिष्यति ?** (क्या प्रधानाचार्या भी जायेंगी ?)

**अध्यापिका - आम् ! सा एव अस्मान् नेष्यति ।** (हाँ ! वे ही हमें लेकर जायेंगी ।)

**छात्राः - परन्तु 'अहं न गमिष्यामि' इति सा उक्तवती ।** (परन्तु 'मैं नहीं जाऊँगी' ऐसा वे बोल रही थीं ।)

**अध्यापिका - पूर्वं किमपि आवश्यक-कार्यम् आपतितम् आसीत्, परन्तु इदानीं तत् कार्यं पूर्णं जातम् ।** (पहले कुछ आवश्यक कार्य आ पड़ा था, परन्तु अब वह कार्य पूरा हो गया ।)

**छात्राः - अतः सा वदति यत् इदानीम् अहं गमिष्यामि ।** (इसलिये वे कह रही हैं कि अब मैं जाऊँगी ।)

## बोधप्रश्नाः – २

१. **'च, एव,अपि, इति, यत्, पूर्वम्, इदानीम्' एतैः अव्ययपदैः रिक्तस्थानानि पूरयन्तु –**
('च, एव,अपि, इति, यत्, पूर्वम्, इदानीम्' इन अव्यय पदों से रिक्त स्थान भरें )

(क) प्रतियोगितायां न केवलं बालकाः अपितु युवकाः .....धाविष्यन्ति ।

(ख) शिशुः दुग्धम् .....पिबति ।

(ग) 'कर्मण्येवाधिकारस्ते' .....श्रीमद्भगवद्गीतायां लिखितम् अस्ति ।

(घ) गुरुः वदति .....सर्वदा सत्यं वदन्तु ।

(ङ) मेघाः आकाशे.....भवन्ति ।

(च) मन्दं मन्दं चलतु .....माता वदति ।

(छ) सरदार-वल्लभ-भाई-पटेलः उक्तवान् ..... 'एकं भारतं श्रेष्ठं भारतम्' ।

(ज) 'स्वराज मेरा जन्मसिद्ध अधिकार है'.....लोकमान्यः बालगङ्गाधर-तिलकः उक्तवान् ।

(झ) ..... सः शनैः शनैः चलति स्म । ..... सः शीघ्रं शीघ्रं चलति ।

(ञ) 'सत्यमेव जयते' ..... मुण्डकोपनिषदि लिखितम् अस्ति ।

(ट) ..... सा छात्रा आसीत् ..... सा अध्यापिका अस्ति ।

## ५.६ कति, कदा, कुतः, इतः, ततः, कथम्, किमर्थम् (कितने, कब, कहाँ से, यहाँ से, वहाँ से, कैसे, क्यों / How many, when, from where, from here, from there, how, why)

**अध्यापिका - पश्यन्तु, उच्चैः पठन्तु, अवगच्छन्तु च** – (देखें, ज़ोर से पढ़ें और समझें)
(See, read loudly and understand)

**अत्र कति पुतकानि सन्ति ?**
(यहाँ कितनी पुस्तकें हैं ?/ How many books are here?)

**तव परीक्षा कदा अस्ति ?**
(तुम्हारी परीक्षा कब है ?/ When is your exam?)

**सः कुतः अगच्छत् ? सः इतः तत्र अगच्छत् ।**

वह कहाँ से गया ? वह यहाँ से वहाँ गया ।

(From where he went? He went from here to there)



**एषः कुतः आगच्छत् ? एषः ततः अत्र आगच्छत् ।**

यह कहाँ से आया ? यह वहाँ से यहाँ आया ।

(From where This boy came? This boy came from there to here)

**तव स्वास्थ्यं कथम् अस्ति ?**

(तुम्हारा स्वास्थ्य कैसा है ?/ How is your health ?)

**त्वं किमर्थं क्रन्दसि ?**

(तुम क्यों रो रहे हो ?/ Why are you crying?)

**अध्यापिका** – **पाण्डवाः कति आसन् ?** (पाण्डव कितने थे ?)

**छात्राः** - **पाण्डवाः पञ्च आसन्।** (पाण्डव पाँच थे।)

**अध्यापिका** - **अर्जुनः कदा विवेकहीनः अभवत् ?** (अर्जुन कब विवेकहीन हो गए?)

**छात्राः** - **अर्जुनः युद्धक्षेत्रे विवेकहीनः अभवत् ।** (अर्जुन युद्ध के समय विवेकहीन हो गए।)

**अध्यापिका** - **हनुमान् संजीवनी-नामकम् औषधं कुतः आनीतवान् ?** (हनुमान् जी संजीवनी-नाम की औषधी कहाँ से लाए थे ?)

**छात्राः** - **हनुमान् संजीवनी-नामकम् औषधं हिमालयात् आनीतवान् ।** (हनुमान् जी संजीवनी-नाम की औषधी हिमालय से लाए थे।)

**अध्यापिका** - **रामः रावणं किमर्थं मारितवान् ?** (राम जी ने रावण को क्यों मारा ? )

**छात्राः** - **रामः रावणं धर्मस्य रक्षायै मारितवान्।** (राम जी ने रावण को धर्म की रक्षा के लिये मारा।)

**अध्यापिका** - **कच्छपः कथं चलति ?** ( कच्छुआ कैसे चलता है ?)

**छात्राः** - **कच्छपः मन्दं मन्दं चलति।** (कच्छुआ धीरे-धीरे चलता है।)

**अध्यापिका** - **रमेशः इतः कुत्र गमिष्यति ?** (रमेश यहाँ से कहाँ जाएगा ?)

**छात्राः** - **रमेशः इतः गृहं गमिष्यति।** (रमेश यहाँ से घर जाएगा। )

**अध्यापिका** - **ततः च कुत्र गमिष्यति ?** (और वहाँ से कहाँ जाएगा ? )

**छात्राः** - **ततः च क्रीडाक्षेत्रं गमिष्यति।** (और वहाँ से क्रीडाक्षेत्र जाएगा।)

## बोधप्रश्नाः – ३

१. **रेखाङ्कित-पदैः प्रश्ननिर्माणं कुर्वन्तु** – (रेखाङ्कित पदों से प्रश्नों का निर्माण कीजिये)

(क) चत्वारः वेदाः सन्ति।

(ख) हिमांशुः पञ्चवादने उत्तिष्ठति ।

(ग) तौ गङ्गातटात् मन्दिरं गतवन्तौ।

(घ) सप्त ऋषयः आसन्।

(ङ) पिता प्रातःकाले भ्रमणाय उद्यानं गमिष्यति।

(च) अध्यापकः उच्चैः वदति ।

(छ) नव रसाः सन्ति।

(ज) गीता पठनाय पुस्तकालयम् अगच्छत्।

(झ) आशीषः शीघ्रं-शीघ्रं खादति।

(ञ) बुधवासरे अस्माकं गृहे पूजा अस्ति।

## ५.६ आम्, न, यतः, निश्चयेन (हाँ, नहीं, क्योंकि, निश्चित रूप से / Yes, no, because, definitely )

**अध्यापिका - पश्यन्तु, उच्चैः पठन्तु, अवगच्छन्तु च** – (देखें, ज़ोर से पढ़ें और समझें)
(See, read aloud and understand)

**किम् एतत् संस्कृतस्य पुस्तकम् ?**
(क्या यह संस्कृत की पुस्तक है ?/ Is this a Sanskrit book ?)

**आम्, एतत् संस्कृतस्य पुस्तकम्।**
(हाँ, यह संस्कृत की पुस्तक है।/ yes, this a Sanskrit book.)

**किम् एतत् शाकम् ?**
(क्या यह सब्जी है?/ Is this a vegetable?)

**न, एतत् फलम् ।**
(नहीं, यह फलम् है।/ No, This is a fruit.)

**भारतं निश्चयेन विश्वगुरुः भविष्यति।**

(भारत निश्चित रूप से विश्वगुरु बनेगा।/India will definitely become Vishva Guru.)

**अहं बहिः न गच्छामि, यतः वर्षा भवति।**

(मैं बाहर नहीं जा रहा, क्योंकि वर्षा हो रही है।/
I'm not going out because it's raining)

**छात्राः** – **किम् भगतसिंहः देशभक्तः आसीत् ?** (क्या भगत सिंह देशभक्त थे?)

**अध्यापिका** - **आम् ! भगतसिंहः देशभक्तः आसीत्।** (हाँ ! भगत सिंह देशभक्त थे।)

**छात्राः** - **किम् अब्दुलकलामः सैनिकः आसीत् ?** (क्या अब्दुलकलाम सैनिक थे ?)

**अध्यापिका** - **न, सः सैनिकः न। अपितु वैज्ञानिकः आसीत्।** (नहीं, वे सैनिक नहीं। अपितु वैज्ञानिक थे।)

द्वितीय बोधः

**छात्राः** - **किं भारतस्य राजधानी दिल्ली अस्ति ?** (क्या भारत की राजधानी दिल्ली है ?)

**अध्यापिका** - **आम् ! भारतस्य राजधानी दिल्ली अस्ति ।** ( हाँ ! भारत की राजधानी दिल्ली है ।)

**छात्राः** - **किं रामायणस्य लेखकः महर्षिः वाल्मीकिः ?** (क्या रामायण के लेखक महर्षि वाल्मीकि हैं?)

**अध्यापिका** - **आम् ! रामायणस्य लेखकः वाल्मीकिः ।** (हाँ ! रामायण के लेखक महर्षि वाल्मीकि हैं ।)

**छात्राः** - **किं विभीषणः रामस्य भ्राता आसीत् ?** (क्या विभीषण राम के भाई थे?)

**अध्यापिका** - **न, विभीषणः रामस्य भ्राता न । अपितु रावणस्य भ्राता आसीत्** ( नहीं, विभीषण राम का भाई नहीं । अपितु रावण का भाई था । )

**छात्राः** - **किं संस्कृतं जनभाषा भविष्यति ?** (क्या संस्कृत जनभाषा बनेगी ?)

**अध्यापिका** - **आम्, संस्कृतं निश्चयेन जनभाषा भविष्यति । (**हाँ**,** संस्कृत निश्चित रूप से जनभाषा बनेगी)

**छात्राः** - **दीपः किमर्थं न ज्वलति ?** (दीप क्यों नहीं जल रहा है ?)

**अध्यापिका** - **गोलदीपः न ज्वलति, यतः विद्युत् न अस्ति ।** (बल्ब नहीं जल रहा है, क्योंकि बिजली नहीं है ।)

**छात्राः** - **सः ऊष्णं जलं किमर्थं पिबति ?** (वह गर्म जल क्यों पी रहा है ? )

**अध्यापिका** - **सः ऊष्णं जलं पिबति, यतः शैत्यम् अनुभवति ।** (वह गर्म जल पी रहा है, क्योंकि ठण्ड महसूस कर रहा है ।)

**बोधप्रश्नाः – ४**

१. **'निश्चयेन, यतः' एताभ्यां अव्ययपदाभ्यां रिक्तस्थानानि पूरयन्तु** – ('निश्चयेन, यतः' इन अव्यय पदों से रिक्तस्थान भरें -)

(क) एते अभ्यासं कुर्वन्ति ..... सम्यक् संस्कृतं वक्तुम् इच्छन्ति ।

(ख) आकाशे मेघाः सन्ति अतः ..... वर्षा भविष्यति ।

(ग) जनाः ऊर्णपटं (स्वेटर) धरन्ति ..... बहु शैत्यम् अस्ति ।

(घ) त्वं परिश्रमं करोषि अतः ..... सफलः भविष्यसि ।

(ङ) काकः जलं न अपिबत् ..... घटे जलं न्यूनम् आसीत् ।

**मयूराः नृत्यन्ति .....वर्षा भवति ।**
५.८ पुरतः, पृष्ठतः, वामतः, दक्षिणतः, उपरि, अधः, अन्तः **,दाईं ओर ,बाईं ओर ,पीछे ,सामने) ऊपर , ,नीचे अन्दर/In front, behind, to the left, to the right, above, under, inside(**

**अध्यापिका - पश्यन्तु, उच्चैः पठन्तु, अवगच्छन्तु च** – (देखें, ज़ोर से पढ़ें और समझें)
(See, read loudly and understand)

१. **अध्यापिकायाः पुरतः छात्राः सन्ति ।** (अध्यापिका के सामने छात्र हैं / There are students in front of the teacher.)
२. **अध्यापिकायाः पृष्ठतः घटी अस्ति ।** (अध्यापिका के पीछे घड़ी हैं / There is a clock behind the teacher.)
३. **अध्यापिकायाः वामतः मानचित्रम् अस्ति ।** (अध्यापिका के बाएँ ओर मानचित्र है / There is a map to the left of the teacher.)
४. **अध्यापिकायाः दक्षिणतः वातायनम् अस्ति ।** (अध्यापिका के दाएँ ओर खिड़की है / There is a map to the right of the teacher.)
५. **अध्यापिकायाः उपरि छदिः अस्ति ।** (अध्यापिका के ऊपर छत्त है /There is roof above the teacher.)
६. **अध्यापिकायाः अधः कटः अस्ति ।** (अध्यापिका के नीचे चटाई है / There is a mat under the teacher.)
७. **कक्षायाः अन्तः छात्राः पठन्ति ।** (कक्षा के अन्दर छात्र हैं / There are students inside the classroom.)

## बोधप्रश्नाः – ५

१. **चित्रं दृष्ट्वा रिक्तस्थानानि पूरयन्तु** – (चित्र को देखकर रिक्तस्थान भरें )

(क) युवकस्य ..... मार्जारः अस्ति ।
(ख) युवकस्य ..... कटः अस्ति ।
(ग) युवकस्य ..... चित्राणि सन्ति ।
(घ) युवकस्य ..... वातायनम् अस्ति ।

द्वितीय बोधः

२. **चित्रं दृष्ट्वा रिक्तस्थानानि पूरयन्तु** – (चित्र को देखकर रिक्तस्थान भरें )

**(क)** बालिकायाः ..... गृहम् अस्ति।

**(ख)** बालिकायाः ..... कटः अस्ति ।

**(ग)** बालिकायाः ..... पुष्पाणि सन्ति ।

**(घ)** बालिकायाः ..... आकाशम् अस्ति।

**(ङ)**

| |
|---|
| ५.९ अद्य, श्वः, परश्वः, प्रपरश्वः, ह्यः, परह्यः, प्रपरह्यः **,आने वाला कल ,आज) आने वाला ,परसों आने वालातरसोंबीता हुआ ,बीता हुआ कल , बीता हुआ ,परसोंतरसों/Today, tomorrow, day after tomorrow, three days after today, yesterday, day before yesterday, three days before today.)** |

**अध्यापिका - पश्यन्तु, उच्चैः पठन्तु, अवगच्छन्तु च** – (देखें, ज़ोर से पढ़ें और समझें)
(See, read loudly and understand)



**अद्य रविवासरः अस्ति ।** (आज रविवार है ।)

**श्वः सोमवासरः अस्ति ।** (कल सोमवार है ।)

**परश्वः मङ्गलवासरः अस्ति ।** (परसों मंगलवार है ।)

**प्रपरश्वः बुधवासरः अस्ति ।** (तरसों बुधवार है ।)

**अद्य रविवासरः अस्ति ।** (आज रविवार है ।)

**ह्यः शनिवासरः आसीत् ।** (कल शनिवार था ।)

**परह्यः शुक्रवासरः आसीत् ।** (परसों शुक्रवार था ।)

**प्रपरह्यः बृहस्पतिवासरः आसीत् ।** (तरसों बृहस्पतिवार था ।)

## बोधप्रश्नाः – ६

१. **रिक्तस्थानानि पूरयन्तु** – ( रिक्तस्थान भरें)

(क) अद्य बुधवासरः अस्ति ।

(ख) ..... शनिवासरः अस्ति ।

(ग) ..... शुक्रवासरः अस्ति ।

(घ) ..... रविवासरः आसीत् ।

(ङ) ..... मङ्गलवासरः आसीत् ।

(च) ..... बृहस्पतिवासरः अस्ति ।

(छ) ..... सोमवासरः आसीत् ।

२. **एतां कथां पठत अव्ययानि च चिनुत** ( इस कथा को पढ़िए, और अव्यय चुनिये )

एकः काकः अस्ति । सः पिपासाम् अनुभवति । सः अत्र पश्यति जलम् न अस्ति । सः तत्र पश्यति जलं न अस्ति । सः सर्वत्र पश्यति जलं न अस्ति । कुत्रापि सः जलं न प्राप्नोति अतः अन्यत्र गच्छति । सः गृहस्य पुरतः घटं पश्यति । सः चिन्तयति यत् घटस्य अन्तः जलं निश्चयेन भविष्यति । अतः समीपं गच्छति । घटस्य अन्तः जलं न्यूनम् अस्ति । अतः सः चिन्तयति यत् एतत् जलम् उपरि कथम् आगमिष्यति ? सः घटस्य दक्षिणतः वामतः च पाषाण-खण्डान् पश्यति । तत्र पाषाणखण्डाः एकत्र सन्ति । सः चिन्तयति यत् अत्र कति पाषाण-खण्डान् क्षिपामि ? सः पाषाण-खण्डान् स्वीकरोति । घटस्य अन्तः क्षिपति । जलं शनैः शनैः उपरि आगच्छति । सः जलं पिबति वदति च अद्य अहं बहु सन्तोषम् अनुभवामि । अन्ते च जलम् एव जीवनम् इति सः चिन्तितवान् ।

## ५.९ सारांशः (Summary)

**अव्ययानि अविज्ञाय वाक्यानाम् अर्थेषु स्पष्टता न भवति । अव्ययानां प्रयोगेन च संस्कृतं सरलं भवति । एतस्मिन् अध्याये वयं अनेकानि अव्ययानि पठितवन्तः । तेषाम् अव्ययानां प्रयोगः कथं करणीयः इति अपि ज्ञातवन्तः । अतः इदानीं यदि छात्राः लकारैः विभक्तिभिः च सह अव्ययानां प्रयोगं करिष्यन्ति,लघुवाक्यानां निर्माणं करिष्यन्ति, तर्हि निश्चयेन संस्कृत-सम्भाषणे लेखने च सरलतया सक्षमाः भविष्यन्ति ।** (अव्ययों को जाने बिना वाक्यों के अर्थों में स्पष्टता नहीं हो पाती है । अव्ययों के प्रयोग से संस्कृत सरल हो जाती है । इस अध्याय में हमने अनेक अव्यय पढ़ें । उन अव्ययों का प्रयोग कैसे किया जाना चाहिये यह भी जाना । इसलिये यदि अब छात्र लकारों व विभक्तियों के साथ अव्ययों का प्रयोग करेंगे और लघु लघु वाक्यों का निर्माण करेंगे, तो निश्चित रूप से संस्कृत सम्भाषण व लेखन में सरलता से सक्षम हो जायेंगे ।)

## ५.१० बोधप्रश्नानाम् उत्तराणि (Answers to the questions)

**बोधप्रश्नानानाम् उत्तराणि – १**

(ख) अत्र (ग) तत्र (घ)तत्र (ङ) अन्यत्र (च) अत्र (छ) तत्र (ज) अत्र (झ) अन्यत्र

**बोधप्रश्नानानाम् उत्तराणि -२**

(क) अपि (ख) एव (ग) इति (घ) यत् (ङ) एव (च) इति (छ) यत् (ज) इति (झ) पूर्वम् , इदानीम् (ञ) इति (ट) पूर्वम् , इदानीम्

**बोधप्रश्नानानाम् उत्तराणि – ३**

(क) कति (ख) कदा (ग) कुतः (घ) कति (ङ) किमर्थम् (च) कथम् (छ) कति (ज) किमर्थम् (झ) कथम् (ञ) कदा

**बोधप्रश्नानानाम् उत्तराणि – ४**

(क) यतः (ख) निश्चयेन (ग) यतः (घ) निश्चयेन (ङ) यतः (च) यतः

**बोधप्रश्नानानाम् उत्तराणि – ५**

१. (क) पुरतः (ख) अधः (ग) पृष्ठतः (घ) दक्षिणतः

२. **(क)** पृष्ठतः (ख) अधः (ग) पुरतः (घ) उपरि

**बोधप्रश्नानानाम् उत्तराणि – ६**

१. (ख) प्रपरश्वः (ग) परश्वः (घ) प्रपरह्यः (ङ) ह्यः (च) श्वः (छ) परह्यः

२. अत्र, तत्र, कुत्र, अपि, सर्वत्र, अन्यत्र, पुरतः, निश्चयेन, यत्, उपरि, अन्तः, दक्षिणतः, वामतः, एकत्र, कति, अद्य, एव, इति ।

## ५.११ सन्दर्भग्रन्थसूची (Bibliography)


- अनुवादरत्नाकरः - डॉ. रमाकान्त त्रिपाठी – चौखम्बा विद्याभवन वाराणसी, २००१
- बृहद् अनुवाद चन्द्रिका - चक्रधर नौटियाल 'हंस' शास्त्री – मोतीलाल बनारसीदास
- भाषाप्रवेशः – डॉ. चाँद किरण सलूजा – संस्कृत भारती दिल्ली
- संस्कृत रचना – श्री वामन शिवराम आप्टे - चौखम्बा विद्याभवन वाराणसी
- संस्कृत शिक्षण सरणी – आचार्य राम शास्त्री - परिमल पब्लिकेशन दिल्ली


## ५.१२ सहायकोपयोगि पाठ्यसामग्री (Suporting study material)


- अनुवाद चन्द्रिका – डॉ. ब्रह्मानन्द त्रिपाठी – चौखम्बा सुरभारती प्रकाशन, वाराणसी
- अनुवाद रत्नाकरः - डॉ. रमाकान्त त्रिपाठी – चौखम्बा विद्याभवन वाराणसी, २००१
- बृहद् अनुवाद चन्द्रिका - चक्रधर नौटियाल 'हंस' शास्त्री – मोतीलाल बनारसीदास
- संस्कृत रचना – श्री वामन शिवराम आप्टे - चौखम्बा विद्याभवन वाराणसी
- संस्कृत शिक्षण सरणी – आचार्य राम शास्त्री - परिमल पब्लिकेशन दिल्ली
- www.ashtadhyayi.com
- spokensanskrit.org


ignou
THE PEOPLE'S
UNIVERSITY